International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(3): 96-100
© 2020 IJSR
www.anantaajournal.com
Received: 19-03-2020
Accepted: 21-04-2020

**Sabnoor Parveen**
M.Phil Scholar, Dept of Sanskrit, Raiganj University, Raiganj, Uttar Dinajpur, West Bengal, India

**Corresponding Author:**
**Sabnoor Parveen**
M.Phil Scholar, Dept of Sanskrit, Raiganj University, Raiganj, Uttar Dinajpur, West Bengal, India

# सांख्ययोगदर्शनयो ईश्वरस्य स्थानम् : समीक्षणमेकम्

**Sabnoor Parveen**

**संक्षिप्तसारः** महर्षिणा कपिलेन प्रणीतं सांख्यसूत्रमिति सांख्यदर्शनस्य प्रधानभित्तिः। पतञ्जलिना विरचितं योगसूत्रन्तु योगदर्शनस्य भित्तिरिति विजानीयादस्माभिः। सांख्यदर्शनन्तु पञ्चविंशतितत्त्वात्मकमिति कथ्यते। तत्र ईश्वरस्यास्तित्वं न स्वीकृतम्। अपरस्मिन् पक्षे योगदर्शनन्तु षड्विंशतितत्त्वात्मकम्। यतोहि ईश्वरस्य विद्यमानता स्वीकृता योगदर्शने। सांख्ययोगदर्शनयो ईश्वरस्य स्थानवर्णनाप्रसङ्गे प्राग् हि सांख्यदर्शनस्योत्सानुसन्धानादनन्तरं तस्य निरीश्वरत्वं प्रतिपादितम्। तथा योगदर्शनस्य सेश्वरत्वं प्रतिपादनादनन्तरमन्तिमे च सिद्धान्तरूपेण ईश्वरासिद्धत्वप्रसङ्गक्रमेण तस्य सांख्यदर्शनस्य निरीश्वरत्वमुपस्थापितम्। अपरस्मिन् पक्षे तु सेश्वर इति नाम्नि प्रसिद्धे पातञ्जलयोगदर्शने निमित्तकारणरूपेण ईश्वरस्य विद्यमानतोपस्थापिता। प्रकृतिपुरुषसंयोगाद्यथा जगदुत्पत्तिर्जायते। प्रकृतिपुरुषविवेकज्ञानादेव तथा मोक्षप्राप्तिर्भवति। प्रकृतिपुरुषयोः विवेकज्ञानन्तु ईश्वरप्रणिधानाद्विना न जायते। ईश्वरप्रणिधानादेव हि पुरुषस्य विवेकख्यातिर्जायते। एवमेव हि सांख्ययोगदर्शनयो ईश्वरस्य स्थानं प्रतिपादितम्।

**मुख्यशब्दाः** सांख्यः, योगः, प्रकृतिः, पुरुषः, विवेकख्यातिः, ईश्वरः, मोक्षः

## भूमिका

यत् सांख्यैः प्राप्यते स्थानं तद् योगैरपि गम्यते।
एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति।। [1]

ये सांख्ययोगयोरभेदं पश्यति, ते यथार्थतत्त्वमुपलभ्यन्ते। सांख्ययोगौ त्वेकस्य पत्रस्य भागद्वयं वर्तते। सांख्यदर्शने यानि तत्त्वानि स्वीक्रियन्ते, तान्येव योगदर्शनेऽप्यङ्गीक्रियन्ते। प्रकृतिपुरुषविवेकज्ञानादेव कैवल्यमाप्नोति इति सांख्यमतं स्यात्। योगमतमपि तथा। जगन्निमित्तकारणेश्वरप्रसङ्गेन हि केवलं सांख्ययोगदर्शनयोः पार्थक्यं दृश्यते। यतो हि सांख्यदर्शने ईश्वरस्य स्वीकृतिर्न दीयते। अपरे तु योगदर्शने सेश्वरवादोऽङ्गीकृतः।

यदि प्रकृतिपुरुषविवेकज्ञानादेव कैवल्यप्राप्तिर्भवति, तर्हि असिद्धात्मकस्य ईश्वरस्य विद्यमानता न स्वीकर्तव्यमिति सांख्यमतं स्यात्। यद्यपि सांख्यदर्शनस्योत्सानुसन्धानं कृत्वा परिलक्ष्यते यत् सांख्यस्तु सेश्वर एव स्यात्। सांख्यसूत्रकारमहर्षिकपिलो भगवतः विष्णोरवतार इति रूपेणापि मन्यते विद्वद्भिः। किन्तु मुलसांख्यदर्शने अपि च वर्तमानोपलब्धस्य सांख्यदर्शनस्य विविधेषु शाखासु ईश्वरासिद्धिरेव प्रतिपादिता स्यात्। अपरस्मिन् पक्षे तु योगदर्शने सांख्यीयपञ्चविंशतितत्त्वेन सह षड्विंशतितत्त्वरूपेण ईश्वरस्यास्तित्वं स्वीकृतम्।

सांख्ययोगदर्शनयोः संक्षिप्तपरिचयः- महामुनिना कपिलेनाभिव्यक्तं दर्शनन्तु सांख्यदर्शनमित्याख्यायते। सम् पूर्वकात् ख्या धातुतः संख्या शब्दस्योत्पत्तिर्जायते। यस्यार्थस्तु परिसंख्यानं गणना वा। संख्येति शब्दादेव सांख्य इति शब्दस्योत्पत्तिर्जायते। पञ्चविंशतिस्तत्त्वानां परिसंख्यानं गणना वा कृतत्वादस्य एवंविधं नामकरणं स्यात्। उक्तञ्च – सांख्यायन्ते सम्यग् ज्ञायन्ते येन तत्सांख्यम् [2] इति। अर्थात् पञ्चविंशतिस्तत्त्वानां सम्यग् ज्ञानं येन शास्त्रेण लभ्यते तदेव सांख्यशास्त्रमित्युच्यते। महर्षिकपिलप्रणीतं सांख्यसूत्रम् इति सांख्यदर्शनस्य मूलभित्तिरिति। अथ हि गुरुशिष्यपरम्परया श्रीमदीश्वरकृष्णप्रणीतं सांख्यकारिका इति वर्तमानोपलब्धस्य सांख्यदर्शनस्य प्रधानभित्तिरूपेणाभिधत्ते।

षड्विधेष्वास्तिकदर्शनेषु योगदर्शनमत्यन्तप्रसिद्धं मन्यते। महर्षिणा पतञ्जलिना विरचितं योगसूत्रम् इति योगदर्शनस्य मूलभित्तिरिति। योगदर्शनस्य परमलक्ष्यन्तु मोक्षप्राप्तिरिति। योगदर्शनन्तु किमिदं जगत्? कोऽयं जीव? इति जिज्ञासां परित्यज्य मोक्षजिज्ञासायामेव हि दृष्टिनिक्षेपं करोति। मोक्षचर्चायां प्रत्येकेषां दर्शनानां तात्त्विकपृष्टभूमि अवश्यमेव तिष्ठति। तथा हि योगदर्शनस्य तात्त्विकपृष्टभूमिस्तु सांख्यदर्शनमिति। प्राथमिकादारभ्य एव योगदर्शने सांख्यप्रतिपादितं तत्त्वमीमांसा स्वीक्रियते।

सांख्ययोगदर्शनयोः तत्त्वानां संक्षिप्तपर्यालोचनम्- सांख्यदर्शने पञ्चविंशतिस्तत्त्वानि स्वीकृतानि। तद्यथा – पुरुषः, प्रकृतिः, महत्, अहंकारः, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः, पञ्चतन्मात्राणि, पञ्चमहाभूतानि चेति। सम्प्रति सांख्यपञ्चविंशतिस्तत्त्वानामतिसंक्षिप्ततया निम्नप्रकारेण वर्णीयते।

पुरुषः – पुरुषस्तु नित्यः, न सः किमपि कार्यं करोति। न चासौ कस्यापि विकारो नित्यत्त्वात्। न च कस्यापि प्रकृतिरिति।

प्रकृतिः – पञ्चविंशतिस्तत्त्वानामन्यतमं तत्त्वन्तु प्रकृतिरिति। सैव मूलप्रकृतिः प्रधानमिति चोच्यते। साऽपि नित्या। अतएव न सा कस्यापि विकृतिः। तदुक्तं – प्रकृतिं पुरुषञ्चैव विद्ध्यनादि उभावपि इति।

अवशिष्टानि त्रयोविंशतिस्तत्त्वानि तु प्रकृतेरेवोत्पद्यन्ते। तदयं सृष्टिक्रमः –

प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि।। [3]

अर्थात् प्रकृतेः महत् (बुद्धितत्त्वम्) उत्पद्यते। महतोऽहंकारः, अहंकारात् शब्दस्पर्शरूपरसगन्धतन्मात्राणि, मनः दशबाह्येन्द्रियाणि चोत्पद्यन्ते। पञ्चतन्मात्रैश्च पञ्चस्थूलभूतानि आकाशादिनि समुत्पद्यन्ते। तदेवं पञ्चविंशतितत्त्वानि सिद्धानि।

अथ हि संक्षेपतः सांख्यशास्त्रीयतत्त्वसमुदयस्य चतुर्विधविभाजनं क्रियते। तद्यथा –

(१) कश्चिदर्थः प्रकृतिरेव न विकृतिः,

(२)कश्चिदर्थः विकृतिरेव न प्रकृतिः,

(३) कश्चिदर्थः प्रकृतिरपि विकृतिरपि च,

(४) कश्चिच्च न कस्यापि प्रकृतिर्नापि कस्यचिद्विकृतिश्चेति।

तत्र मूलप्रकृतिः प्रकृतिरेव, न हि कस्यापि सा विकारा। निखिलस्य कार्यसंघातस्य सैव मूला, न त्वस्या मूलान्तरं किमप्यस्ति। विकाराः षोडशकाः। ते – पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि मनः पञ्चमहाभूतानि चेति। प्रकृतिविकृतयस्तु सप्त एव – महदहंकारपञ्चतन्मात्राणि। न प्रकृतिर्नापि विकृतिरेकरेव पुरुषः।

अन्यस्मिन् पक्षे योगदर्शने सांख्यीयपञ्चविंशतिस्तत्त्वैः सह ईश्वरतत्त्वमपि स्वीकृतम्। अतो हि योगदर्शने षड्विंशतिस्तत्त्वानि स्वीकृतानि। ईश्वरतत्त्वविहाय योगदर्शनन्तु सांख्यदर्शनसदृश एव वर्तते। अतो हि पण्डितैः योगदर्शनन्तु सांख्यदर्शनादभिन्नं मन्यते। पञ्चविंशतिस्तत्त्वैः सह ईश्वरतत्त्वस्वीकृतत्वात् योगदर्शनं सेश्वरसांख्योऽपि कथ्यते। श्रीमद्भगवद्गीतायां सांख्ययोगयोरभिन्नता प्रतिपादिता। तद्यथा –

सांख्ययोगौ पृथग्वाला प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्।। [4]

सांख्ययोगदर्शनयोः ईश्वरस्य स्वरूपपर्यालोचनम्- पञ्चविंशतितत्त्वात्मके सांख्यदर्शने ईश्वरस्यासिद्धत्त्वं प्रतिपादितम्। अन्यत्र हि योगदर्शने षड्विंशतमं तत्त्वन्तु ईश्वरमिति। अर्थात् जगदुत्पत्तिर्व्याख्याने उपादाननिमित्तकारणतया ईश्वरस्य स्थानवर्णनाप्रसङ्गे नञर्थकमतमुपस्थापितं सांख्यदार्शनिकैः। अपि च सदर्थकमतमुपस्थापितं योगदार्शनिकैरिति। नञर्थकार्थप्रतिपादितत्त्वादपि सांख्यदर्शनस्योत्पत्तेर्बीजं विस्तारश्च पर्यालोचनेन तस्य सांख्यदर्शनस्य सेश्वरत्त्वमपि प्रतिपादितम्। यद्यपि मूलसांख्यदर्शनन्तु निरीश्वरत्त्वस्य प्रतिपादको वर्तते।

सेश्वरसांख्यम् - विद्वन्मण्डलेषु सांख्यदर्शनन्तु सर्वाधिकप्राचीनतमं दर्शनमिति कथ्यते। यतो हि

सांख्यदर्शनस्योत्पत्तेर्बीजन्तु वेदेषु दरीदृश्यते। यथा ऋग्वेदे ऋषिणा आह –

> द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
> तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति।। 5

अपि च –

> पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्। 6 इति श्रुतेः।

इतोऽपि सांख्यदर्शनस्योत्पत्तेः सङ्केतस्तु कठ-केन-मुण्डक-छान्दग्य-बृहदारण्यक-मैत्रायणी-श्वेताश्वतरेत्याद्युपनिषदां प्राप्यन्ते। महाभारत-स्मृति-पुराणग्रन्थेष्वपि सांख्यदर्शनस्य तथ्यं परिलक्ष्यते। ऋग्वेदादारभ्य स्मृत्यादिषु ग्रन्थेषु प्राप्तसांख्यतत्त्वानां मध्ये अधिकाधिकरूपेण सेश्वरसांख्यतत्त्वमेव हि प्रतिपादितं स्यात्। यथा ऋग्वेदे ऋषिणोक्तम् –

> सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
> स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशाङ्गुलम्।। 7

अत्र हि विराटपपुरुषरूपेण षड्विंशतत्त्वात्मकपरमेश्वर एव सूचितम्। उपनिषत्सु श्वेताश्वतरोपनिषदेव सांख्यदर्शनस्य मूलभित्तिरिति। श्वेताश्वतरोपनिषद्युल्लेखितं यत् व्यक्ताव्यक्तात्मकजगदिदं परमेश्वरेण हि ध्रियते। तच्चोक्तं ऋषिणा –

> संयुक्तमेतत् क्षरमक्षरञ्च व्यक्ताव्यक्तं भरते विश्वमीशः।
> अनीशश्चात्मा बध्यते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः।। 8

महाभारते शान्तिपर्वण्याह –

> अव्यक्तबोधनाच्चापि बुध्यमानं वदन्त्युत।
> पञ्चविंशं महात्मानं न चासावपि बुध्यते।।
> षड्विंशं विमलं बुद्धमप्रमेयं सनातनम्।
> स तु तं पञ्चविंशं च चतुर्विंशं च बुध्यते।। 9

पुनश्च तत्रैवोच्यते –

> अव्यक्तपुरुषाभ्यां तु यत् स्यादन्यन्महत्तरम्।
> तं विशेषमवेक्षेत विशेषेण विचक्षणः।। 10

आलोच्यमहाभारतादुद्धृतयोः उदाहरणद्वयोः सेश्वरसांख्यतत्त्वं सूचितम्।

एवं हि यदि सांख्यदर्शनस्योत्पत्तेर्बीजं पर्यालोचनं क्रियते तर्हि तस्य सांख्यदर्शनस्य सेश्वरत्वमेव प्रतिपादितं भवेदिति नात्र कोऽपि संशयः।

अथ सांख्यसूत्रस्य तृतीयाध्याये सांख्यसूत्रकारेण स हि सर्ववित् सर्वकर्ता 11 इति सूत्रं कृतम्। सूत्रस्यास्य व्याख्यानवसरे श्रीविज्ञानभिक्षुनोच्यते तस्य सांख्यप्रवचनभाष्ये – स हि पूर्वसर्गे कारणलीनः सर्गान्तरे सर्ववित् सर्वकर्तेश्वर आदि पुरुषो भवति 12 इति। पुनश्च सूत्रकारेणोद्धृतम् – ईदृशेश्वरसिद्धिः सिद्धा 13 इति। प्रवचनभाष्यकारेणोक्तम् – प्रकृतिलीनस्य जन्येश्वरस्य सिद्धिः, 'य सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' (मुंड.उप.1.1.9) इत्यादि श्रुतिभ्यः सर्वसम्मतैव नित्येश्वरस्यैव विवादास्पदत्वादित्यर्थः 14 इत्येतयोः सूत्रद्वयोः जगत्स्रष्टेश्वरस्यैव प्रतीतिर्भवति। तस्माद्धि सेश्वरसांख्यमिति वक्तुं योग्यम्।

निरीश्वरसांख्यदर्शनम् - सांख्यदर्शनन्तु प्रायशः निरीश्वरवादीदर्शनेषु परिगण्यते। अस्माभिः ज्ञायते यत् सांख्यदर्शनस्य प्रधानभित्तिस्तु महर्षिकपिलप्रणीतं सांख्यसूत्रम् इति। अथ गुरुशिष्यपरम्परया श्रीमदीश्वरकृष्णप्रणीतं सांख्यकारिका इत्येवं वर्तमानोपलब्धसांख्यदर्शनस्य प्रधानसाक्ष्यं वर्तते। सांख्यसूत्रादारभ्य सांख्यकारिकापर्यन्तं सम्प्रत्युपलब्धेषु ग्रन्थेषु सांख्यदर्शनस्य निरीश्वरवादीता एव हि सिद्धं भवति। सांख्यदर्शने जगदुत्पत्तेरुपादाननिमित्तकारणतया ईश्वरस्यास्तित्वं न स्वीकृतम्। दर्शनस्यास्यानुसारं प्रकृति-पुरुषौ एव हि परमे द्वे तत्त्वे स्तः। अपि च पुरुषस्य सन्निधिमात्रैव प्रकृतये यथार्थं स्यात्। यद्यपि प्रकृतेः सृष्टिकार्यस्योपादाननिमित्तकारणरूपेण पुरुषं न मन्यते। तथापि पुरुषस्य सन्निधिस्तु सृष्टिकार्यं प्रति अत्यावश्यकं मन्यते। वत्सविवृद्धनिमित्तं यथा अचेतनस्य दुग्धस्य प्रवृत्तिर्जायते तथैव पुरुषस्य विमुक्तेः निमित्तं प्रकृतेर्प्रवृत्तिर्जायते। तत्राह सांख्यकारिकायाम् –

> वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
> पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य।। 15
> मोक्षप्राप्तिस्तु प्रकृतिपुरुषयोः विवेकज्ञानादेव जायते। अतो हि पुरुषस्य मोक्षनिमित्तमीश्वरस्यावश्यकता नास्त्येव।

उपनिषद्-महाभारत-गीता-मनुस्मृति-पुराणेषूल्लेखिते सांख्यसिद्धान्ते ईश्वरस्य प्रतीतिर्भवति। ग्रन्थेष्वेतेषु परमात्मनं नित्यत्वमित्युच्यते। अपि च प्रकृतिः पुरुषस्तु तस्याधीनं मन्यते। किन्तु सांख्यदर्शने तु ईश्वरस्यासिद्धिरेव

प्रतीयते। यतो हि सांख्यसूत्रकारेण सूत्रं प्रणीतम् – ईश्वरासिद्धेः [16] इति। पुनश्चोच्यते – मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः [17] इति। ईश्वरस्तु न मुक्तः नापि बद्धः। यदि वदेतेश्वरस्तु मुक्तः तर्हि तस्य जगत्स्रष्टृत्वोपपन्नं नैव भवति। यतो हि मुक्तपुरुषे तु सृष्टिरचनानुकूलप्रयत्नादि भवितुं नार्हति। यदि बद्धं वदेत तर्हि तेन हि बद्धत्वात् सृष्टिरचनानुकूलव्यापार न सम्भाव्यते। उच्यते – उभयथाऽप्यसत्करत्वम् [18] इति।

पुनश्च ईश्वरस्याविद्यमानता प्रसङ्गे सांख्यसूत्रस्य पञ्चमेऽध्याये परिलक्ष्यते यत् – कर्मफलप्राप्तेः कारणतया ईश्वरस्याधिष्ठातृत्वं न स्वीकृतम्। तच्च – नेश्वराधिष्ठिते फलनिष्पत्तिः कर्मणा तत्सिद्धिः [19] इति। यतो हि ईश्वरस्याधिष्ठातृत्वे सति स्वोपकारार्थं लोकवदधिष्ठानं स्यात्। तच्च – स्वोपकारादधिष्ठानं लोकवत् [20] इति। एवं सति ईश्वरस्यापि उपकारस्वीकारे सोऽपि लोकेश्वरवदेव संसारी स्यात्। अथवा सः कल्पनामात्रमेव स्यादित्यर्थः। उक्तश्च – लौकिकेश्वरवदितरथा [21] अपि च पारिभाषिको वा [22] इति। प्रवृत्तौ तु रागस्य प्रतिनियतकारणता विद्यमानत्वादीश्वरस्याधिष्ठातृत्वं न सिद्ध्यति। यतो हि - न रागादृते तत्सिद्धिः प्रतिनियतकारणत्वात् [23] इति। रागसम्बन्धमपि स्वीक्रियमाणे ईश्वरस्तु नित्यमुक्तो न स्यात्। तच्च – तद्योगेऽपि न नित्यमुक्तः [24] इति।

अथ ह्युच्यते – प्रधानशक्तियोगाच्चेत् सङ्गपत्तिः [25] अपि च सत्तामात्राच्चेत् सर्वैश्वर्यम् [26] इति। अर्थात् प्रधानशक्तियोगात् पुरुषस्यापि सङ्गापत्तिः। अपि च सत्तामात्रात् सर्वेषामैश्वर्यत्वं प्रतिपादयिष्यति। अतो हि सिद्धान्तरूपेण वक्तुं शक्यते यत् – प्रमाणाभावान्न तत्सिद्धिः [27] इति। अतः वक्तुं शक्यते यत् सांख्यदर्शनन्तु निरीश्वरवादीदर्शनमिति। तत्र ईश्वरस्यास्तित्त्वं न स्वीकृतं प्रमाणाभावादिति।

योगदर्शने ईश्वरस्वरूपम्- प्रागेवोक्तं यत् सांख्ययोगयोर्मध्ये नास्ति किमपि पार्थक्यमिति। अतो सांख्यपञ्चविंशतिस्तत्त्वानि योगदर्शनेऽपि स्वीकृतम्। पातञ्जलयोगदर्शने तु सांख्यपञ्चविंशतिस्तत्त्वैः सह ईश्वरनामकं षड्विंशतमं तत्त्वं स्वीकृतम्। ईश्वरस्वीकृतत्त्वात् सेश्वरसांख्यनाम्नाप्यभिधीयते। योगानुसारमीश्वरस्तु न बध्यते नापि मुच्यते। योगसूत्रकारेण समाधिफललाभप्रसङ्गे ईश्वरस्यालोचना कृता। तत्र समाधिपादे पतञ्जलिनाह – ईश्वरप्रणिधानाद्वा [28] इति। अर्थात् तस्येश्वरस्य सङ्कल्पमात्रादेव योगस्य समाधिलाभः समाधिफलश्च शीघ्रमेव सम्पाद्यते।

अथ आशङ्का जायते – कोऽयमीश्वरो यस्तु प्रधानपुरुषव्यतिरिक्तः? अपि च यस्य सङ्कल्पाद्विना समाधिः न लभते? इत्याशङ्कायां योगसूत्रकारेण प्रधानपुरुषव्यतिरिक्तस्येश्वरस्य स्वरूपं वर्णीयते– क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः [29] इति। अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः धर्माधर्मादि कर्म, कर्मफलं तु विपाक आशयः विषयवासना च। यः पुरुषविशेष एतेभ्यः तथाकथितभोगविषयेभ्यः अपरामृष्टः सम्पर्करहितो वा स एव ईश्वर इति तात्पर्यम्। तस्येश्वरस्य ज्ञानं निरतिशयं वर्तते। तस्मादतिरिक्तं ज्ञानं कस्यापि न भवति। ज्ञानमिदं हीश्वरस्य सर्वज्ञतायाः साधकं मन्यते। योगसूत्रकारेणाह – तत्र निरतिशयं सर्व्वज्ञवीजम् [30] इति। यः परमपुरुषः दिनमासादिना कालेनापरिच्छेद्य अर्थात् अनादि यस्तु प्रथमोत्पन्नगुरुब्रह्मादेरप्युपदेशकः स एव ईश्वरः। यथाह – पूर्व्वेषामपि गुरुः कालेनानवच्छेदात् [31] इति। यथा वर्त्तमानसृष्टिरादेः ज्ञानप्रकर्षेण ईश्वरसिद्धिर्भवति तथैव हि अन्यान्यसृष्ट्यामीश्वरसिद्धिरवबोध्यते। किमस्य सङ्केतकृत्यं वाच्यवाचकत्वं वेत्याशङ्कायामाह- तस्य वाचकः प्रणवः [32] इति। अर्थात् ईश्वरस्य वाचकस्तु प्रणव ओङ्कार वेति। अत्र हि प्रणवो वाचक ईश्वरस्तु वाच्यः। वाच्यवाचकतारूपसम्बन्धोऽयं किं सङ्केतकृतमथवा प्रदीपप्रकाशवदि्स्थतम्? इत्याशङ्कायां वक्तुं शक्यते पदेन सह अर्थस्य सम्बन्धस्तु स्वतः सिद्धः। सङ्केतेन हि केवलं तस्याभिव्यक्तिर्जायते। वाच्यवाचकसम्बन्धमपेक्ष्य सर्गान्तरेऽपि शब्दार्थस्य सङ्केतः क्रियते। अतः शब्दजन्यमर्थज्ञानस्य नित्यतया शब्दार्थसम्बन्धस्तु नित्यमेव। योगिनः ईश्वरस्य प्रणवस्य च वाच्यवाचकरूपसम्बन्धं विशेषेण ज्ञात्वा वाचकस्य प्रणवस्य जपः वाच्यस्येश्वरस्य चोपासना करिष्यन्ति। यतो हि प्रणवस्य जपः प्रणवार्थेश्वरस्य भावना च कुर्वन् योगिनः चित्तैकाग्रं सम्पाद्यते। तच्चाह – तज्जपस्तदर्थभावनम् [33] इति। अथ योगसूत्रकारेण पतञ्जलिना पुनरेकं सूत्रं कृतम् – ततः प्रत्यक्चेतनाधिगमोऽपान्तरायाभावश्च [34] इति। अर्थात् व्याधिप्रभृतयः ये तावदन्तरायाः अर्थात् चित्तस्य विक्षेपकाः ते सर्वा ईश्वरप्रणिधानेन हि तिरोहितं भवति। अपि च एतेन हि योगिनां स्वरूपदर्शनं भवति। एवमेव हि पातञ्जलयोगदर्शने ईश्वरस्य सत्ता विद्यमानता वा प्रमीयते।

**उपसंहारः** सांख्ययोगदर्शनयो ईश्वरस्य स्वरूपवर्णनाप्रसङ्गे सिद्धान्तरूपेण उर्ध्वोक्तालोचनानुसारमुपलभ्यते यत्- ईश्वरस्य सिद्धिप्रसङ्गात् सांख्यदर्शनन्तु निरीश्वरवादीदर्शनमिति मन्यते। यद्यपि सांख्यदर्शनस्योत्सानुसन्धानं कुर्वन् तस्य सेश्वरत्वमेव प्रतिपादितम्। यतो हि वेदोपनिषद्गीताषु च अधिकाधिकरुपेण सांख्यदर्शनस्य सेश्वरत्वस्य दृष्टान्तमेव प्रतिपादितं स्यात्। तथापि प्रकृतिपुरुषविवेकज्ञानात्मोक्षप्राप्तिप्रसङ्गात् ईश्वरस्यासिद्धत्वप्रसङ्गाच्च सांख्यदर्शनन्तु निरीश्वरवादीदर्शनरूपेण प्रसिद्धिं भजते। अपरस्मिन् पक्षे तु सांख्यपञ्चविंशतितत्त्वैः सह ईश्वरतत्त्वमप्यत्यन्तगुरुत्वपूर्णं स्थानं लभते योगदर्शने। यतो हि ईश्वरप्रणिधानादेव हि प्रकृति-पुरुषौ विवेकख्यातिर्जायते। जगन्निमित्तकारणतया

अपि च जगत्परिणामस्याश्रयरूपेणापि ईश्वरन्तु अत्यावश्यकतत्त्वरूपेण स्वीकृतवन्तः योगदार्शनिकाः। अतो हि योगदर्शनन्तु सेश्वरदर्शनरूपेण प्रसिद्धमिति शम्।

**सन्दर्भ**


1. श्रीमद्भगवद्गीता-५/५
2. सांख्यकारिका(ईश्वरकृष्णकृता), थानेशचन्द्र उप्रेति, चौखम्बा संस्कृत प्रतिष्ठान, दिल्लि, संस्करण २०१६, पत्रसंख्या-१
3. सांख्यकारिका(ईश्वरकृष्णकृता), सुधांशु कुमार षडङ्गी, चौखम्बा सुरभारती प्रकाशन, वाराणसी,
4. संस्करण २०१६, कारिका-२२, पत्रसंख्या-९१
5. श्रीमद्भगवद्गीता-५/४
6. ऋग्वेदः -१/१६४/२०
7. ऋग्वेदः -१०/९०/२
8. ऋग्वेदः -१०/९०/१
9. उपनिषद् ग्रन्थावली(प्रथम भाग), स्वामी गम्भीरानन्द, उद्बोधन कार्यालय, कलकाता, ३य संस्करण २०१७, श्वेताश्वतरोपनिषद् १/८, पत्रसंख्या-३६७
10. महाभारतम् - १२/३०८/६,७
11. महाभारतम् - १२/२१७/६,७
12. सांख्यदर्शनम्(महर्षिकपिलप्रणीतम्), जनार्दन शास्त्री पाण्डेयः, मोतिलाल बनारसी दास, दिल्लि, १म संस्करण १९८९, सूत्रसंख्या - ३/५६, पत्रसंख्या-२१६
13. तदेव, सांख्यप्रवचनभाष्यम् - ३/५६, पत्रसंख्या-२१६
14. तदेव,सूत्रसंख्या - ३/५७, पत्रसंख्या-२१६
15. तदेव, सांख्यप्रवचनभाष्यम् - ३/५७, पत्रसंख्या-२१७
16. सांख्यकारिका(ईश्वरकृष्णकृता), सुधांशु कुमार षडङ्गी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करण २०१६, कारिका-५७, पत्रसंख्या-१७७
17. सांख्यदर्शनम्(महर्षिकपिलप्रणीतम्), उदयवीर शास्त्री, विजयकुमार गोविन्दराम हासानन्द, दिल्लि, संस्करण २०१७, सूत्रसंख्या - १/९२, पत्रसंख्या-६७
18. तदेव, सूत्रसंख्या - १/९३, पत्रसंख्या-६८
19. तदेव, सूत्रसंख्या - १/९४, पत्रसंख्या-६९
20. सांख्यदर्शनम्(कपिलमुनिप्रणीतम्), गजाननशास्त्री मुसलगाँवकर, चौखम्बा संस्कृत संस्थान, वाराणसी, १म संस्करण १९८७, सूत्रसंख्या - ५/२, पत्रसंख्या-५६०
21. तदेव, सूत्रसंख्या - ५/३, पत्रसंख्या-५६१
22. तदेव, सूत्रसंख्या - ५/४, पत्रसंख्या-५६२
23. तदेव, सूत्रसंख्या - ५/५, पत्रसंख्या-५६३
24. तदेव, सूत्रसंख्या - ५/६, पत्रसंख्या-५६४
25. तदेव, सूत्रसंख्या - ५/७, पत्रसंख्या-५६५
26. तदेव, सूत्रसंख्या - ५/८, पत्रसंख्या-५६६
27. तदेव, सूत्रसंख्या - ५/९, पत्रसंख्या-५६६
28. तदेव, सूत्रसंख्या - ५/१०, पत्रसंख्या-५६८
29. पातञ्जलदर्शन(महर्षिपतञ्जलिप्रणीतम्), पूर्णचन्द्र शर्मा, कलकाता, संस्करण १८९८, सूत्रसंख्या - १/२३, पत्रसंख्या-४४
30. तदेव, सूत्रसंख्या - १/२४, पत्रसंख्या-४५
31. तदेव, सूत्रसंख्या - १/२५, पत्रसंख्या-४८
32. पातञ्जलयोगदर्शनम्(महर्षिपतञ्जलिप्रणीतम्), सुरेशचन्द्र श्रीवास्तव्य, चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करण २०१८, सूत्रसंख्या - १/२६, पत्रसंख्या-९२
33. तदेव, सूत्रसंख्या - १/२७, पत्रसंख्या-९३
34. तदेव, सूत्रसंख्या - १/२८, पत्रसंख्या-९६
35. तदेव, सूत्रसंख्या - १/२९, पत्रसंख्या-९८